# संस्कृत वार्ता:

दिनाङ्क : 11/03/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा अद्य केरलस्य एर्नाकुलम-नगरे प्रायः एकादश-सहस्र-कोटि-रूप्यकाणां विविधाः विकास-परियोजनाः राष्ट्राय समर्पिताः।
- भारते प्रथमवारं परोक्ष-इच्छामृत्योः अनुमतिः प्रयच्छता उच्चतम-न्यायालयेन एकस्य द्वात्रिंशत्-वर्षीयस्य पुरुषस्य कृते कृत्रिम-जीवन-रक्षक-प्रणाल्याः निष्कासनाय अनुमतिः प्रदत्ता, यः विगत-द्वादश-वर्षेभ्यः 'कोमा' इति अचेतनावस्थायां वर्तते ।
- छत्तीसगढराज्ये अष्टोत्तरैकशत माओवादिनः शरणागताः।
- धनुर्विद्या-क्रीडायां भारतं द्वाविंशति-वर्षाणां अनन्तरं दिल्ल्यां प्रथमवारम् सप्तविंशत्यधिक-द्विसहस्रतमवर्षस्य एशिया कप स्पर्धायाः आध्यक्षं विधास्यति।

---

<u>प्रधानमन्त्री-कोच्चीयात्रा</u>

प्रधानमन्त्रिणा अद्य केरलस्य एर्नाकुलम-नगरे प्रायः एकादश-सहस्र-कोटि-रूप्यकाणां विविधाः विकास-परियोजनाः राष्ट्राय समर्पिताः। श्रीमोदी भारत पेट्रोलियम कॉर्पोरेशन लिमिटेड' इत्यस्य कोच्चि-परिष्करणशालायां पॉलीप्रोपाइलीन-संयन्त्रस्य आधारशिलां स्थापितवान्। अस्याः परियोजनायाः व्ययः पञ्चशताधिक-पञ्चसहस्रकोटि-रूप्यतोऽप्यधिकः वर्तते, अस्य संयन्त्रस्य क्षमता च प्रतिवर्षं चतुश्शतकिलो-टन् परिमिता अस्ति। मार्ग-संरचना-क्षेत्रे प्रधानमन्त्रिणा द्वे प्रमुखे राजमार्ग-परियोजने उद्घाटिते। प्रथमा परियोजना राष्ट्रिय-राजमार्ग-षट्षष्टिः इत्यस्य थलपाडी-चेङ्गला खण्डस्य षट्-पथीयकरणम् इत्यस्ति, या पञ्चाशदधिक-षड्शतोत्तर-द्विसहस्रकोटि-रूप्यकाणां व्ययेन निर्मिता। एषः मार्गः मुम्बई-कन्याकुमारी आर्थिक-वीथिमार्गस्य भागः अस्ति, येन कासरगोड-कन्नूर-मण्डलयोः तथा मङ्गलोर-मुझप्पिलङ्गद-क्षेत्राणां च सम्पर्कः सुदृढीभविष्यति। द्वितीया परियोजना वेङ्गलं-रामनट्टुकारा पर्यन्तं कोझिकोड-बाइपास

इत्यस्य षट्-पथीयकरणम् अस्ति, यस्य निर्माणव्ययः प्रायः चत्त्वारिंशदधिकैकशतोत्तर-द्विसहस्रकोटि-रूप्यकाणि वर्तते ।

-------------------------------------------------

<u>प्रधानमन्त्री-कोच्चीयात्रा-2</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य अवदत् यत् वर्तमानकाले वैश्विक-ऊर्जा-सङ्कटं पुनः एकवारं आत्मनिर्भरतायाः महत्त्वं स्पष्टीकरोति। श्रीमोदी अकथयत् यत् ऊर्जा-क्षेत्रे अन्यदेशेषु निर्भरतां न्यूनीकर्तुं सर्वकारेण विगतवर्षेषु अनेके पदक्षेपाः उत्थापिताः। प्रधानमन्त्री कोच्चि-नगरे "**मोदिना सह विकसित-केरलम्**" इति विषयकम् एनडीए-सम्मेलनं सम्बोधयन् आसीत्। सः अवदत् यत् पेट्रोल-डीजल-इन्धनानां निर्भरतां न्यूनीकर्तुं विद्युत्-वाहनेभ्यः सौरोर्जा-परियोजनाभ्यश्च च प्रोत्साहनं प्रदीयते।

-------------------------------------------------

<u>उच्चतम-न्यायालयः</u>

भारते प्रथमवारं परोक्ष-इच्छामृत्योः अनुमतिः प्रयच्छता उच्चतम-न्यायालयेन एकस्य द्वात्रिंशत्-वर्षीयस्य पुरुषस्य कृते कृत्रिम-जीवन-रक्षक-प्रणाल्याः निष्कासनाय अनुमतिः प्रदत्ता, यः विगत-द्वादश-वर्षेभ्यः 'कोमा' इति अचेतनावस्थायां वर्तते । परोक्ष-इच्छामृत्युः सा प्रक्रिया अस्ति यस्यां रोगिणः आवश्यकोपचारस्य अथवा जीवन-रक्षक-प्रणाल्याः निरोधेन तस्य स्वाभाविक-मृत्योः मार्गः प्रशस्तीक्रियते।

गाजियाबाद-निवासी हरीश-राणा, यः पञ्जाब-विश्वविद्यालयस्य छात्रः आसीत्, त्रयोदशाधिक-द्विसहस्रतमे वर्षे स्वनिवासस्य चतुर्थ-तलात् पतनेन शिरसि गम्भीर-क्षतिं प्राप्तवान्। ततः आरभ्य सः दशकाधिकं यावत् अचेतनावस्थायाम् अस्ति। न्यायमूर्ति जे.बी. पारदीवाला तथा न्यायमूर्ति के.वी. विश्वनाथन इत्यनयोः पीठेन 'एम्स-देहली' इति संस्थायै निर्दिष्टं यत् सा राणा-महोदयं 'पैलिएटिव-केयर' इत्यत्र प्रवेशं प्रदद्यात्, येन तस्य चिकित्सा-उपचारं विरम्य तस्मै शान्तिपूर्ण-मृत्युः प्राप्नुयात्।

-------------------------------------------------

## छत्तीसगढराज्य

छत्तीसगढराज्ये अद्य चतुः चत्वारिंशत् महिला-कार्यकर्तृभिः सह अष्टोत्तरैकशत माओवादिनः शरणागताः। बस्तर्-प्रदेशस्य विभागीय-मुख्यालये जगदलपुरे वरिष्ठ-आरक्षक-अधिकारिणां समक्षं माओवादिनः शरणागताः।

---------------------------------------------

## प्रधानमन्त्री-सभा

प्रधानमन्त्री नरेन्द्रमोदी अद्य देशस्य मत्स्याजीवि-समुदायस्य कल्याणाय एनडीए-सर्वकारस्य प्रतिबद्धतां पुनः प्रतिपादितवान्। प्रधानमन्त्रिणा उक्तं यत् भाजपा-नेतृत्वे एनडीए-सर्वकारः मत्स्याजीवि-समुदायस्य सामर्थ्यं तथा नील-अर्थव्यवस्थायां तस्य प्रमुखां भूमिकां सम्यक् विजानाति। प्रधानमन्त्री अद्य कोच्चि-नगरे अखिल-केरल-धीवरसभायाः स्वर्णजयन्ती-समारोहं सम्बोधयन् एतान् विचारान् प्रकटितवान्।

अखिल-केरल-धीवरसभायाः कार्यं प्रशंसयन् प्रधानमन्त्री अवदत् यत् एषा संस्था मत्स्याजीविनां अधिकाराणां कृते निरन्तरं कार्यं कुर्वती अस्ति। सः अधिकं स्पष्टीकृतवान् यत् अनया संस्थया जीवन-जीविकोपार्जनयोः तथा च प्रगति-प्रकृत्योः मध्ये सन्तुलनस्य एकं श्रेष्ठं उदाहरणं प्रस्तुतम्।

---------------------------------------------

## राष्ट्रपति-जलशक्तिः

राष्ट्रपतिपदासीना द्रौपदी मुर्मूः अद्य प्रतिपादितवती यत् जलसंरक्षणं प्रत्येकनागरिकस्य परमं कर्तव्यं वर्तते। नवदिल्ल्यां जायमानस्य षड्विंशत्यधिक-द्विसहस्रतमस्य जल-महोत्सवस्य राष्ट्रिय-कार्यक्रमं सम्बोधयन्ती राष्ट्रपतिः राष्ट्रं प्रति आह्वानं कृतवती यत् जलम् अमूल्य-निधिः वर्तते अतः आगामि-वंशेन तस्य संरक्षणं करणीयम्। एकस्य शाश्वत-भविष्यस्य निर्माणाय राष्ट्रपतिः मुर्मूः सर्वान् प्रार्थितवती यत् जलसंरक्षणं केवलं अभ्यासमात्रं न, अपितु जीवनपद्धतिः भवेत् ।

राष्ट्रपतिः अवदत् यत् नल-जल-मित्र-कार्यक्रमान्तर्गतं ग्रामीण-युवभ्यः स्वयं-सहायता-समूहानां महिलाभ्यश्च जल-आपूर्ति-प्रणालीनां सञ्चालने अनुरक्षणे च सक्रिय-सहभागितायै प्रशिक्षिणं प्रदीयते ।

उल्लेखनीयं वर्तते यत् षड्विंशत्यधिक-द्विसहस्रतमस्य जल-महोत्सवस्य आरम्भः मार्च-मासस्य अष्टमे दिनाङ्के सम्पूर्णे देशे जल-अर्पण-कार्यक्रमेण सह अभवत्, एतत् वस्तुतः अस्य मासस्य द्वाविंशति दिनाङ्क-पर्यन्तं प्रचलिष्यति।

---------------------------------------------

**गृहमन्त्रालय - छत्तीसगढ**

गृहमन्त्रालयेन सूचितं यत् छत्तीसगढस्य षट् मण्डलेषु अष्टोत्तरशत माओवादिनः शरणागताः। एतेषु मण्डलेषु बिजापुरः, दन्तेवाडा, सुक्मा, बस्तर, नारायणपुर, कङ्केर च सन्ति। एतेषां माओवादी जानानां कृते पंचनवतिः लक्षोत्तर त्रिकोटिरूप्यकाणां पुरस्कारधनस्य घोषणा विहितेति मन्त्रालयः ब्रूते। पूर्वं केन्द्रीय-गृह-मन्त्री अमितशाहः पुनः अवोचत् यत् मासस्यास्य अन्ते भारतं नक्सल्-मुक्तं निश्चयेन भविष्यति।

---------------------------------------------

**अमेरिकादेश**

अमेरिकादेशस्य राष्ट्रपतिः डोणाल्ड् ट्रम्पः अघोषयत् यत् अमेरिकादेशः पंचाशत् वर्षेषु स्वस्य प्रथमं तैलशुद्धीकरणं प्राप्स्यति, यस्य वित्तपोषणं रिलायन्स् इण्डस्ट्रीस् संस्थायाः निवेशेन भविष्यति। ट्रम्प्-वर्यः अवदत् यत् टेक्सास्-नगरस्य पोर्ट्-आफ़्-ब्रौन्स्विल्ले-इत्यत्र नूतनं शोधनं अमेरिकादेशस्य विपणिं प्रवर्धयिष्यति, राष्ट्रियसुरक्षां सुदृढां करिष्यति, अमेरिकादेशस्य ऊर्जा-उत्पादनं वर्धयिष्यति, सहस्रशः उद्योगाः च कल्पयिष्यति। एतत् ऐतिहासिकं त्रिशत् बिलियन्-डालर्- संधिः इति वर्णयन्, ट्रम्प् वर्यः सामाजिकान्तर्जालीय पटले उक्तवान् यत् एतत् अमेरिकादेशस्य इतिहासे बृहत्तमम् अस्ति सममेव अमेरिकादेशस्य कार्यकतृणां, ऊर्जायाः , दक्षिण-टेक्सास्-प्रदेशस्य जनानां च महत् विजयः अस्ति इति। परन्तु आधिकारिकः संवादः सम्प्रति यावत् नासीत् ।

---------------------------------------------

**धनुर्विद्या-प्रतियोगिता**

भारतं द्वाविंशति-वर्षाणां अनन्तरं प्रथमवारम् अन्तरराष्ट्रीय-धनुर्विद्या-प्रतियोगिताम् आयोजयितुं सज्जम् अस्ति। सप्तविंशत्यधिक-द्विसहस्रतमे वर्षे एशिया-चषक-धनुर्विद्या-क्रीडायाः द्वितीय-चरणस्य आयोजनं दिल्ली-नगरे भविष्यति। पञ्चाधिक-द्विसहस्रतमे वर्षे अन्तिमवारं देशे प्रमुखा अन्तरराष्ट्रीय-धनुर्विद्या-प्रतियोगिता आयोजिता आसीत्, यदा एशियन्-धनुर्विद्या-प्रतिस्पर्धा दिल्ली-नगरे सम्पन्ना आसीत्।

।। इति वार्ता: ।।